# ॥ ध्यानम् ॥

श्रुति-स्मृति-पुराणानाम् आलयं करुणालयम्।
नमामि भगवत्पाद-शङ्करं लोक-शङ्करम्॥

गामाक्रम्य पदेऽधिकाञ्चि निबिडं स्कन्धैश्चतुर्भिस्तथा
व्यावृण्वन् भुवनान्तरं परिहरंस्तापं स-मोह-ज्वरम्।
यः शाखी द्विज-संस्तुतः फलति तत् स्वाद्यं रसाख्यं फलं
तस्मै शङ्कर-पादपाय महते तन्मस्-त्रि-सन्ध्यं नमः॥

अज्ञानान्तर्गहन-पतितान् आत्म-विद्योपदेशैः
त्रातुं लोकान् भव-दव-शिखा-ताप-पापच्यमानान्।
मुक्त्वा मौनं वट-विटपिनो मूलतो निष्पतन्ती
शम्भोर्मूर्तिश्चरति भुवने शङ्कराचार्य-रूपा॥

नमामः शङ्करान्वाख्य-विजयेन्द्र-सरस्वतीम्।
श्री-गुरुं शिष्टमार्गानुनेतारं सन्मति-प्रदम्॥

सत्य-नारायण-क्षेत्रात् सत्यव्रतमुपागतम्।
आश्रये कामकोटीशं सत्य-श्री-चन्द्रशेखरम्॥

श्री-सत्य-चन्द्रशेखरेन्द्र-सरस्वती-श्रीचरणान् ध्यायामि। श्री-सत्य-चन्द्रशेखरेन्द्र-सरस्वती-श्रीचरणान् आवाहयामि।

श्री-सत्य-चन्द्रशेखरेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, आसनं समर्पयामि।

श्री-सत्य-चन्द्रशेखरेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, स्वागतं व्याहरामि। पूर्णकुम्भं समर्पयामि।

श्री-सत्य-चन्द्रशेखरेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, पाद्यं समर्पयामि।

श्री-सत्य-चन्द्रशेखरेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, अर्घ्यं समर्पयामि।

श्री-सत्य-चन्द्रशेखरेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, आचमनीयं समर्पयामि।

श्री-सत्य-चन्द्रशेखरेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, मधुपर्कं समर्पयामि।

श्री-सत्य-चन्द्रशेखरेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, स्नपयामि। स्नानानन्तरम् आचमनीयं समर्पयामि।

श्री-सत्य-चन्द्रशेखरेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, वस्त्रं समर्पयामि।

श्री-सत्य-चन्द्रशेखरेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, यज्ञोपवीतं समर्पयामि।
श्री-सत्य-चन्द्रशेखरेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, दिव्य-परिमलगन्धान् धारयामि।
गन्धस्योपरि हरिद्राकुङ्कुमं समर्पयामि।
श्री-सत्य-चन्द्रशेखरेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, अक्षतान् समर्पयामि। पुष्पैः पूजयामि।

# दक्षिणामूर्त्यष्टोत्तरशतनामावलिः

विद्यारूपिणे नमः
महायोगिने नमः
शुद्धज्ञानिने नमः
पिनाकधृते नमः
रत्नालङ्कृतसर्वाङ्गाय नमः
रत्नमालाजटाधराय नमः
गङ्गाधारिणे नमः
अचलावासिने नमः
सर्वज्ञानिने नमः
समाधिकृते नमः १०
अप्रमेयाय नमः
योगिनिधये नमः
तारकाय नमः
भक्तवत्सलाय नमः
ब्रह्मरूपिणे नमः
जगद्व्यापिने नमः
विष्णुमूर्तये नमः
पुरातनाय नमः
उक्षवाहाय नमः
चर्मवाससे नमः २०
पीताम्बरविभूषणाय नमः
मोक्षदायिने नमः
मोक्षनिधये नमः
अन्धकारये नमः
जगत्पतये नमः
विद्याधारिणे नमः
शुक्लतनवे नमः
विद्यादायिने नमः
गणाधिपाय नमः
पदाऽपस्मारसंहर्त्रे नमः ३०
शशिमौलये नमः
महास्वनाय नमः
सामप्रियाय नमः
अव्ययाय नमः
साधवे नमः
सर्ववेदैरलङ्कृताय नमः
हस्ते वह्निधराय नमः
श्रीमते नमः
मृगधारिणे नमः
वशङ्कराय नमः ४०

